International Journal of Sanskrit Research 2022; 8(3): 376-378

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 376-378
© 2022 IJSR
www.anantaajournal.com
Received: 20-03-2022
Accepted: 25-05-2022

**डॉ० सूर्य मोहन कुमार**
पुस्तकालय सहाकय, शिक्षाशास्त्र विभाग, का०सि०द०सं०वि०वि०, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० सूर्य मोहन कुमार**
पुस्तकालय सहाकय, शिक्षाशास्त्र विभाग, का०सि०द०सं०वि०वि०, दरभंगा, बिहार, भारत

# प्रधाननाटककाराणामन्यतमस्य भवभूतेवस्तिविकं नामधेयं श्रीकण्ठ परिचय:

## डॉ० सूर्य मोहन कुमार

**सारांश:**
संस्कृते प्रधाननाटककाराणामन्यतमस्य भवभूतेवस्तिविकं नामधेयं श्रीकण्ठ आसीत्। विदर्भाभिजनो विश्रुतश्रीत्रियकुलोत्पन्नौऽसौ स्वयं नानाशास्त्रपारदृश्वा बभूव। तस्याद्यकृतावालोचकैः कटु आलोचितायामपि स्वकाव्यकलाप्रकर्षे प्रतियन् भविष्यति काले तद्गुणादरं सम्भावयन् स अभग्नोत्साहो नाटकान्तर-रचनाप्रवृत्तो बभूव। वाग्देवी दासी भूत्वा यथा ब्रह्माणं सेवते तथैव तमिति खलु स्याभिमान आसीत्। पुनश्च तन्मते निर्दोषायामपि कविकृतौ जनस्तथैव दोषसम्भावनां कुरुते यथा सत्यां स्त्रियाम्। अथ-

‘ये नाम केचिदिह नः प्रथयन्त्यवज्ञां,
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यते तु मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥’
इत्युक्त्वा तेन स्वसमीक्षकाः सम्यग् अधिक्षिप्ताः।

**कूटशब्द:** प्रधाननाटककाराणामन्यतमस्य, नानाशास्त्रपारदृश्वा, नानाशास्त्रपारदृश्वा

## प्रस्तावना

भवभूतेर्महावीरचरितं, मालतीमाधवम्, उत्तररामचरितं, चेति रूपकत्रयं केवलमुपलभ्यते। एतन्नाम्ना सदुक्तिसङ्ग्रहेषु उद्धृतैः, पूर्वोक्तरूपकत्रये चाप्राप्यमाणैः, पद्यैस्त्वनुमीयते यत्। कृत्यन्तरमप्यस्यावश्यमासीद् यदप्रणष्टं चेत् कदाचिल्लब्धं भविष्यति। इह तावद् रूपकाण्यस्याधस्तात् परिचाय्यन्ते।

‘उत्तरे रामचरिते भवभूतिर्विशिष्यते’ इति स्तूयमानसौष्ठवमुत्तररामचरितन्नाम भवभूतेर्द्वितीयं रूपकं तस्य प्रोढा कृतिः। कवित्वे प्रौढिमासाद्यैव तेनैतद्रुपकं रचितमिति स्वयमेव तत्रोक्तं तेन-

‘शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्।’

'उत्तररामचरितं नामकरणेन प्रतीयते यद् रामायणोत्तरकाण्डगता रामकथाऽत्र ग्रथिता, परन्तु नाटकोपयुक्तं परिवर्तनं कृतम्। तत्र मुख्यानि परिवर्त्तनानि यथा –

1. प्रथमतश्चित्रदर्शनम्,
2. अदृश्यया सीतादेव्या वासन्तीरामचन्द्रयोः कथालापश्रवणम्,
3. वासन्तीसमक्षं रामेण स्वहृदयानुरागस्य सीतामात्रविषयकत्वप्रकटनम्,
4. लवचन्द्रकेतुयुद्धम्,
5. वसिष्ठादेः प्राचेतसाश्रमगमनम्,
6. रामसमक्षं तदीयचरितस्यैवाभिनयञ्चेति।

य एव शोकः सीताया वियोगे रघुवंशनायकं रामचन्द्रं व्यथयामास स एव शोकोऽत्रोत्तरचरितेऽपि रामं व्यथयति, परन्तु यद्यपि रघुवंशस्य 'वैदेहिबन्धोर्हृदयं विदद्रे' तथापि धीर इवासौ भ्रातृन् समाहूय सीतापरित्यागप्रकारं विधिवदादिश्य चान्तरेव व्यथां नियमयति। मन्ये कालिदासः शोकं व्यञ्जनया प्रकाशयति, भवभूतिस्तु रामं तथा रोदयति यथा तद्रुदितेन पाषाणहृदया अपि रुदन्ति। रघुवंशस्य रामः प्रथमं राजा तदनन्तरं मनुष्य इति स राजोचितमाचारं पालयति, भवभूतेस्तु रामः प्रथमं मनुष्यस्ततो राजेति स मानवीयामधीरतां शोकाश्रुप्रवाहरूपेणाविष्कुरुते। कालिदासस्य रामः सत्यपि दृढे सीतानुरागे लोकाचारं पालयति, परं लोकाचारपालनप्रवृत्तेः पूर्वं दोलाचलचित्तवृत्तित्वं प्रतिपद्यते-

'किमात्मनिर्वादकथामुपेक्षे सीतामदोषामुत सन्त्यजामि।
इत्येकपक्षाश्रयविक्लवत्वादासीत् स दोलाचलचित्तवृत्तिः ॥'

भवभूतेस्तु रामः किमप्यविचार्यैव कर्त्तव्यमवधारयति, वाढं तेन स्वाचरणेनाजीवनं पुटपाकप्रतीकाशं सन्तापमनुभवति-

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥'
रामस्य कर्त्तव्यज्ञानमक्षुण्णमेव सत्यपि कष्टाधिक्ये।

भवभूतिः वाल्मीकिकालिदासयोः कवित्वं कुत्रापि तादृशं साम्यं नासाद्यते, येन भावापहारकृतं लाघवं दृष्टौ पतेत्। यत्र कालिदासः प्रकृतेललितं कोमलं च पक्षं स्वकविताया विषयतां नयति तत्र भवभूतिः प्रकृतेर्विकटमुग्रं चांशं स्वकविताया विषयतां प्रापयति। कालिदासः-

'कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी,
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।'

इति वर्णयति तत्र भवभूतिः

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः
समानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ 'इति।
अनयोः पद्ययोः पर्यालोचनेन रुचिवेसादृश्यं स्पष्टं प्रतिभासते।

कस्य कवित्वं कीदृशमिति विचारो दृष्टिकोणभेदमाधारीकरोति केचन वर्णनपक्षं प्रशंसन्ति, परे हृदयपक्षम्। वर्णनपक्षे प्रौढिरभ्यासपाण्डित्याभ्यामासाद्यते, हृदयपक्षे प्रौढिस्त्वन्तस्तत्त्वपरीक्षणे निपुणैः सूक्ष्मतामानुभवैरवाप्यते। माघस्य काव्ये वर्णनस्य प्राचुर्ये सत्यपि हृदयपक्षो रिक्त इव। भवभूतेः कवित्वमुभयसामञ्जस्येन पूर्णम्। असौ यद्येकतः-

गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारवत्कीचक
क्रन्दत्फेरवचण्डधात्कृतिभृतप्राग्भारभीमैस्तटैः ॥

अथवा

'लोकालोकालवालस्खलनपरिपतत्सप्तमाम्भोधिपूरं
विश्लिष्यत्पर्वकल्पत्रिभुवनमखिलोत्खातपातालमूलम्।
पर्यस्तादित्यचन्द्रस्तवकमवपतद्भूरिताराप्रसूनं
ब्रह्मस्तम्बं धुनीयानिह तु मम विद्यावस्ति तीव्रो विषादः॥'
ईदृशं कम्पोत्पादकं वर्णनं कर्तुं क्षमते, तर्ह्यपरतः-
'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥'

अथवा

'व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु अहिरुपाधीन् प्रीतयः संश्रयन्ते। विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥

ईदृशान्यनुभवैकलभ्यानि हृदयमर्मस्पृशि वर्णनानि कर्त्तुमपि क्षमते। गुणगौरवेण भवभूतेरन्यद्रूपकद्वयमतिक्रम्य वर्तते तदीयमुत्तररामचरितामित्युक्तमपि केनचित्-'उत्तरे रामचरिते भवभूतिर्विशिष्यते'। अत्र नाटके पात्राणां चरित्राणि नितान्तोज्ज्वलानि चित्रितानि। यद्यपि कतिपये समालोचका अत्रापि क्रियावेगस्याभावं कथयन्ति परन्तु तन्नात्र तथा प्रकटम्। अन्तिमाङ्के भवभूतिना यो नाटकान्तरसमावेशः कृतस्य तु कालिदासकृतीनामपि मुखं मलिनयति।

महावीरचरितं भवभूते आद्याकृतिरिति सम्भावयन्ति परीक्षकाः। अत्र भवभूतिना स्वपूर्वपुरुषेतिवृत्तं सविस्तरमुपन्यस्तम्। अपरिष्कृताऽस्य रचना 'काव्याभ्यासकाले किल कविनेदं कृतम्' इति लिङ्गयति। अत्र कवि रामरावणयोः शात्रवं महावीरं (रामं) निहन्तुं रावणकृतानभ्युपायांश्च कथावस्तुत्वेन निबबन्ध। अत्र रामायणात् कथामुपादाय बहुशः कर्त्रा तद्रूपमन्यथा यितं दृश्यते। इह यद्यपि मालतीमाधवस्य कल्पनासौष्ठवमिव कल्पनासौष्ठवं कल्पनासौष्ठवं न विद्यतेऽथापि कथानकस्यैक्यं यथाऽत्रास्ते न तथा मालतीमाधवे। अत्रत्यानि कतिपयानि प्रकरणानि तावदनाटकीयानीव भान्ति, विस्तरजालेन च पात्राणां दीर्घदीर्घैर्भाषणैश्चेह क्रियावेगस्य प्रगतिः बाध्यते। चरित्रचित्रणं च तथा मन्दं वर्तते यथा रावणमाल्यवतोर्महत्त्वास्पदयोः पात्रयोरपि व्यक्ती सम्यङ् नैव विभाव्येते।

प्रकरणभिधे दशाङ्कमये मालतीमाधवं कथासरित्सागरस्थाः नानाकथा एककथात्वेन परिणमय्य किमपि रुचिरमभिनवं वस्तूत्पादितं भवभूतिना। यदि नाम मृच्छकटिकमवलोक्य तादृशं किमपि रमणीयं रूपकं निर्मातुं कवेर्मनस्युत्साह उत्थितः स्यात्। मृच्छकटिके यथा मनोरमो हास्यरसोऽवाप्यते, न तथा पुनरत्र। अत्र तावद् तवदूषकस्यैव यदाभावस्तदा हास्यऽरसवृत्तेः किमु वक्तव्यम्। जगति यद्यच्च घोरं भीषणमतिमानुषं चास्ति तत्र तत्र तु महान् भवभूतिमनोऽभिनिवेशः खलु विलोक्यते।

मालती नाम काचिद् राजसचिवसुता यथा माधवनाम्नि कस्मिंश्चित् विद्यार्थिन्यन्वरज्यत तथैव सोऽपि तस्याम्। तयोः प्रणयकथा मालतीमाधवे वर्ण्यविषयत्वेनोपात्ता। मालतीपितुः स्वामी नृपो मालत्या विरक्तिभाजनेन येन स्वप्रियपुरुषेण मालतीं परिणाययितुमैच्छद् विवाहदिने मकरन्दो नाम माधवमित्रं मालतीवेषं परिधाय वधूत्वेन सह अयासीत्। कथां याथार्थ्येनोपस्कर्तुं कृतेऽपि कविनाऽतनुप्रयत्ने पात्राणां शोकानुरागव्यवहारयोः पाठकानां सत्यत्वप्रतीतिर्न जायते। सहसा दैवयोगाद् द्विः ध्रुवाद् मरणाद् मालतीप्राणरक्षा भवतीति सर्वमपि हि कथानकं दैवयोगानुप्राणितं भाति। नवमाङ्के प्रणष्टां प्रियतमां प्रति संदेशं हर्तु माधवेन प्रार्थितो मेघो मेघदूतवृत्तं चतुर्थोऽङ्कश्च विक्रमोर्वशीयगतमुदन्तं स्मारयति। कालिदासस्य कामनीयकरामणीयकयोर्भवभूतौ असतोरपि,अङ्केऽस्मिन् भवभूतिः करुणरसपाके कालिदासमतिशेते।

## संदर्भ


1. बृहदारण्यके 6.2.4; छान्दोग्ये 5.111
2. ऋग्वेदे 10.71.9
3. ऋग्वेदे 9.112.11
4. विष्णुधर्मसूत्रे 29.3.41
5. छान्दोग्ये 8.7.3
6. अथर्व० 9.5.18
7. बाल० 27.13
8. आश्वलायन०